শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমদ্ভাগৱতে দশমস্কন্ধে

# ॥ শ্রীমুচুকুন্দস্তুতিঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ শ্রীমুচুকুন্দস্তুতিঃ ॥

ৱিমোহিতোঽযং জন ঈশমাযযা
    ৎৱদীযযা ৎৱাং ন ভজত্যনর্থদৃক্।
সুখায দুঃখপ্রভৱেষু সজ্জতে
    গৃহেষু যোষিৎপুরুষশ্চ ৱঞ্চিতঃ ॥ **1** ॥

লব্ধ্ৱা জনো দুর্লভমত্র মানুষং
    কথঞ্চিদৱ্যঙ্গমযত্নতোঽনঘ।
পাদারৱিন্দং ন ভজত্যসন্মতিঃ
    গৃহান্ধকূপে পতিতো যথা পশুঃ ॥ **2** ॥

মমৈষ কালোঽজিত নিষ্ফলো গতো
    রাজ্যশ্রিযোন্নদ্ধমদস্য ভূপতেঃ।
মর্ত্যাত্মবুদ্ধেঃ সুতদারকোশভূ -
    ষ্ৱাসজ্জমানস্য দুরন্তচিন্তযা ॥ **3** ॥

কলেৱরেঽস্মিন্ঘটকুড্যসন্নিভে
    নিরূঢমানো নরদেৱ ইত্যহম্।
ৱৃতো রথেভাশ্ৱপদাত্যনীকপৈঃ
    গাং পর্যটংস্ত্ৱাগণযন্সুদুর্মদঃ ॥ **4** ॥

প্রমত্তমুচ্চৈরিতি কৃত্যচিন্তযা
    প্রৱৃদ্ধলোভং ৱিষযেষু লালসম্।
ৎৱমপ্রমত্তঃ সহসাভিপদ্যসে
    ক্ষুল্লেলিহানোঽহিরিৱাখুমন্তকঃ ॥ **5** ॥

পুরা রথৈর্হেমপরিষ্কৃতৈশ্চরন্
মতঙ্গজৈর্ৱা নরদেৱসঞ্জ্ঞিতঃ।
স এৱ কালেন দুরত্যযেন তে
কলেৱরো ৱিটকৃমিভস্মসঞ্জ্ঞিতঃ॥ 6॥

নির্জিত্য দিকচক্রমভূতৱিগ্রহো
ৱরাসনস্থঃ সমরাজৱন্দিতঃ।
গৃহেষু মৈথুন্যসুখেষু যোষিতাং
ক্রীডামৃগঃ পূরুষ ঈশ নীযতে॥ 7॥

করোতি কর্মাণি তপস্সুনিষ্ঠিতো
নিৱৃত্তভোগস্তদপেক্ষযা দদৎ।
পুনশ্চ ভূযেযমহং স্ৱরাডিতি
প্রৱৃদ্ধতর্ষো ন সুখায কল্পতে॥ 8॥

ভৱাপৱর্গো ভ্রমতো যদা ভৱে -
জ্জনস্য তর্হ্যচ্যুত সৎসমাগমঃ।
সৎসঙ্গমো যর্হি তদৈৱ সদ্গতৌ
পরাৱরেশে ৎৱযি জাযতে মতিঃ॥ 9॥

মন্যে মমানুগ্রহ ঈশ তে কৃতো
রাজ্যানুবন্ধাপগমো যদৃচ্ছযা।
যঃ প্রার্থ্যতে সাধুভিরেকচর্যযা
ৱনং ৱিৱিক্ষদ্ভিরখণ্ডভূমিপৈঃ॥ 10॥

ন কামযেঽন্যং তৱ পাদসেৱনা -
দকিঞ্চনপ্রার্থ্যতমাদ্বরং ৱিভো।
আরাধ্য কস্ত্বাং হ্যপৱর্গদং হরে
ৱৃণীত আর্যো ৱরমাত্মবন্ধনম্॥ 11॥

তস্মাদ্বিসৃজ্যাশিষ ঈশ সর্ব্বতো
    রজস্তমঃসত্ত্বগুণানুবন্ধনাঃ।
নিরঞ্জনং নির্গুণমদ্বয়ং পরং
    ৎৱাং জ্ঞাপ্তিমাত্রং পুরুষং ব্রজাম্যহম্॥ **12** ॥

চিরমিহ বৃজিনার্তস্তপ্যমানোঽনুতাপৈ -
    রবিতৃষষডমিত্রোঽলব্ধশান্তিঃ কথঞ্চিৎ।
শরণদ সমুপেতস্ত্বৎপদাব্জং পরাত্ম -
    ন্নভযমৃতমশোকং পাহি মাপন্নমীশ॥ **13** ॥

॥ ইতি শ্রীমুচুকুন্দস্তুতিঃ সমাপ্তা ॥